# Shri Rudrachandi Trailokyamangala Kavacham

# શ્રીરુદ્રચણ્ડી ત્રૈલોક્યમઙ્ગલકવચમ્

## Document Information

Text title : rudrachaNDItrailokyamaMgalakavacham

File name : rudrachaNDItrailokyamaMgalakavacham.itx

Category : devii, kavacha, devI

Location : doc_devii

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari, NA

Description/comments : Rudrayamala tantra

Latest update : May 16, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીરુદ્રચણ્ડી ત્રૈલોક્યમઙ્ગલકવચમ્

॥ પૂર્વપીઠિકા ॥

શ્રીપાર્વત્યુવાચ ।
દેવદેવ ! મહાદેવ ! દયાલો ! દીનવત્સલ ! ।
કેન સિદ્ધિં દદાત્યાશુ ચણ્ડી ત્રૈલોક્યદુર્લભા ॥ ૧॥

શ્રીમહાદેવ ઉવાચ ।
રુદ્રેણારાધિતા ચણ્ડી મહાસિદ્ધિર્ભવેત્ તદા ।
રુદ્રરૂપા રુદ્રભાવા રુદ્રભૂષા સદા સ્થિતા ॥ ૨॥

રુદ્રધ્યેયા રુદ્રગેહા રુદ્રાણી રુદ્રવલ્લભા ।
સર્વદા વરદા દેવી બ્રહ્મજ્ઞાનપ્રદાયિની ॥ ૩॥

સર્વપાપહરા દેવી સર્વરોગક્ષયઙ્કરી ।
સર્વારિષ્ટગતૈર્દાત્રી સર્વગ્રહનિવારિણી ॥ ૪॥

શિવં દેહિ શુભં દેહિ સુખં દેહિ સદા પ્રિયે ! ।
તુષ્ટિં પુષ્ટિં જયારોગ્યં મઙ્ગલાનાં ચ મઙ્ગલમ્ ॥ ૫॥

અકાલમરણં વાપિ કાલે મૃત્યુર્યદા ભવેત્ ।
ચણ્ડીસ્મરણમાત્રેણ મૃત્યોર્મૃત્યુકરં પરમ્ ॥ ૬॥

જ્ઞાત્વા દેવગણાઃ સર્વે ચણ્ડ્યભૂદ્ રુદ્રગેહિની ।
રુદ્રચણ્ડી તદા ખ્યાતા ત્રૈલોક્યે પરમેશ્વરી ॥ ૭॥

રુદ્રોઽભવન્મહારુદ્રશ્ચણ્ડીપાઠપ્રસાદતઃ ।
તદા શાપઃ પ્રદાતવ્યઃ સ્વીયસિદ્ધિર્યદા શિવે ! ॥ ૮॥

કૃષ્ણેનારાધિતા ચણ્ડી કૃષ્ણચણ્ડી ન સિદ્ધિદા ।
કૃષ્ણનામધરા દેવી સર્વતન્ત્રેષુ ગોપિતા ॥ ૯॥

કૃષ્ણચણ્ડી મહાદેવી પ્રાણાન્તે ન પ્રકાશિતા ।

જ્ઞાત્વા ચણ્ડીં જગત્ સર્વં કૃષ્ણશાપોઽભવત્ તદા ॥ ૧૦॥

તદન્તે ચણ્ડિકાં જ્ઞાત્વા કૃષ્ણશાપોઽભવન્મુદા ।
સ્વીયભાવે તદા દેવી અભિશાપં કરોતિ હિ ।
તેન તે સ્વીયપાપેન ન સિદ્ધ્યન્તિ કદાચન ॥ ૧૧॥

શ્રીપાર્વત્યુવાચ ।
દેવદેવ દીનનાથ દીનબન્ધો ! દયાનિધે ! ।
ઇદાનીં વદ મે નાથ ! ચણ્ડીસિદ્ધિકરં પરમ્ ॥ ૧૨॥

વિના ધ્યાનં વિના પૂજાં વિના જપપરાયણમ્ ।
વિના હોમં વિના મન્ત્રં વિના સાધનસંજ્ઞકમ્ ॥ ૧૩॥

અનાયાસેન સિદ્ધ્યન્તિ કેનોપાયેન તદ્ વદ ॥

શ્રીમહાદેવ ઉવાચ ।
શ‍ૃણુ પાર્વતિ સુભગે ! ચણ્ડીસિદ્ધિકરં પરમ્ ।
રુદ્રધ્યેયા રુદ્રચણ્ડી પ્રસન્ના સર્વદા સતી ॥ ૧૪॥

તસ્યાહં કવચં દેવિ ! કથયામિ શુચિસ્મિતે ! ।
ત્રૈલોક્યે સર્વદેવાનાં સાધનેનૈવ યત્ ફલમ્ ॥ ૧૫॥

તત્ ફલં લભતે સદ્યઃ કવચાધ્યાયમાત્રતઃ ।
શતમષ્ટૌ પઠેદ્ યસ્તુ સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૧૬॥

શતાવૃત્તિં પઠેદ્ યો હિ સપ્તદ્વીપેશ્વરો ભવેત્ ।
પઞ્ચાશત્ પાઠમાત્રેણ પઞ્ચાશદ્વર્ણસિદ્ધયે ॥ ૧૭॥

અષ્ટાવિંશતિપાઠેન અષ્ટસિદ્ધિઃ કરે સ્થિતા ।
એકાદશ પઠેદ્ યસ્તુ રુદ્રસ્તસ્ય પ્રસન્નધીઃ ॥ ૧૮॥

દશવિદ્યાઃ પ્રસિદ્ધ્યન્તિ યઃ પઠેદ્ દશધા શિવે ! ।
નવાવૃત્તિં પઠેદ્ યો હિ ગ્રહદેવપ્રસન્નધીઃ ॥ ૧૯॥

અષ્ટાવૃત્તિં પઠેદ્ યસ્તુ અષ્ટપાશૈર્વિમુચ્યતે ।
સપ્તધા પાઠમાત્રેણ ચિરાયુર્ભવેત્ ધ્રુવમ્ ॥ ૨૦॥

પઠેત્ ષષ્ઠં કર્મભેદે ષટ્કર્મસિદ્ધયે ધ્રુવમ્ ।
પઞ્ચમં પ્રપઠેદ્ યસ્તુ પઞ્ચાત્મા ચ પ્રસન્નધીઃ ॥ ૨૧॥

ચતુર્થં પ્રપઠેદ્ યસ્તુ ચતુર્વેદવિદાં વરઃ ।

ત્રિધા પાઠે મહેશાનિ ! સર્વશાન્તિર્ભવિષ્યતિ ॥ ૨૨॥

પાઠ દ્વયં કૃતં યદ્ધિ સર્વકામ્યં પ્રસાધયેત્ ।
એકધા પાઠમાત્રેણ ચણ્ડીસિદ્ધિર્ભવિષ્યતિ ॥ ૨૩॥

અતઃ પરમહં વક્ષ્યે કવચં ચ પરાત્પરમ્ ।
રક્ષાકરં મહામન્ત્રં ત્રૈલોક્યમઙ્ગલાભિધમ્ ॥ ૨૪॥

પ્રણવો વાગ્ભવો માયા તતઃ સદ્યઃ સનાતની ।
સ્થિરા માયા તતઃ કામો લજ્જાયુગ્મં તતઃ પરમ્ ॥ ૨૫॥

એષ નવાક્ષરો મન્ત્રઃ સર્વાશાપરિપૂરકઃ ।
અગ્નિસ્તમ્ભં જલસ્તમ્ભં વાયુસ્તમ્ભં તતઃ પરમ્ ॥ ૨૬॥

બહુ કિં કથ્યતે દેવિ ! ત્રૈલોક્યસ્તમ્ભનં ભવેત્ ।
કર્ષયેદખિલં દેવિ ! શોષયેદખિલં જગત્ ॥ ૨૭॥

મોહયેદખિલાન્ લોકાન્ મારયેત્ સકલં જગત્ ।
વશયેત્ સર્વદેવાદીન્ ઋતુભેદે મહેશ્વરિ ! ॥ ૨૮॥

સર્વરક્ષાકરો મન્ત્રઃ સાક્ષાદ્ બ્રહ્મ ન સંશયઃ ।
(નવાક્ષર મન્ત્રઃ ૐ ઐં હ્રીં ૐ ક્રીં હ્લીં ક્લીં હ્રીં હ્રીં)

॥ કવચસ્તોત્ર ॥

શિખાયાં પ્રણવઃ પાતુ શિરસિ વાગ્ભવઃ પ્રિયે ! ।
ભ્રૂમધ્યે રક્ષતે માયા હૃદયં કાલિકાઽવતુ ॥ ૧॥

નાભિં પાતુ સ્થિરા માયા તદધઃ કામ રક્ષતુ ।
લિઙ્ગમૂલં પાતુ લજ્જા યજુર્ગુહ્યે સદાઽવતુ ॥ ૨॥

કટિં પૃષ્ઠ કૂર્પરં ચ સ્કન્ધં કર્ણદ્વયં તથા ।
પ્રણવો રક્ષતે દેવિ ! માતૃભાવેન સર્વદા ॥ ૩॥

કણ્ઠં ગલં ચ ચિબુકં ઓષ્ઠદ્વયં તતઃ પરમ્ ।
દન્તં જિહ્વાં તથા રન્ધ્રં તદન્તે મુખમણ્ડલમ્ ॥ ૪॥

વાગ્ભવો રક્ષતે દેવિ ! પિતૃભાવેન સર્વદા ।
નાસિકાં હનુયુગ્મં ચ ચક્ષુષી ભ્રૂયુગં તથા ॥ ૫॥

લલાટં ચ કપાલં ચ ચન્દ્રસૂર્યાઽગ્નિમણ્ડલમ્ ।

સર્વદા રક્ષતે માયા શક્તિરૂપે મહેશ્વરિ ! ॥ ૬॥

બાહુદ્વયં તતઃ સર્વં પઞ્જરં હૃદિમણ્ડલમ્ ।
રક્ષતે કાલિકાવીજં કન્યારૂપેણ સર્વદા ॥ ૭॥

ઉદરં મૂલદેશં ચ ચણ્ડિકે ! ત્વં સદાઽવતુ ।
રક્તં માંસં તથા મજ્જા શુક્રાણિ મેદ એવ ચ ॥ ૮॥

રક્ષેલ્લજ્જા શક્તિરૂપે સગુણા પરમા કલા ।
નખકેશાનિ સર્વાણિ યજુઃ પાતુ સદા પ્રિયે ! ॥ ૯॥

સર્વાઙ્ગં રક્ષતે ચણ્ડી સર્વમન્ત્રં સકીલકમ્ ।
આત્મા પરાત્મા જીવાત્મા ચણ્ડિકા પાતુ સર્વદા ॥ ૧૦॥

સાધને ચણ્ડિકા પાતુ સજ્જ્ઞાનં ચણ્ડિકાઽવતુ ।
સત્સઙ્ગં ચણ્ડિકા પાતુ સદ્યોગં ચણ્ડિકાઽવતુ ॥ ૧૧॥

સત્કથાં ચણ્ડિકા રક્ષેત્ સચ્ચિન્તાં ચણ્ડિકાઽવતુ ।
પૂર્વસ્યાં ચણ્ડિકા પાતુ આગ્નેય્યાં ચણ્ડિકાઽવતુ ॥ ૧૨॥

દક્ષિણસ્યાં તથા ચણ્ડી સર્વદા પરિરક્ષતુ ।
નૈરૃત્યાં ચણ્ડિકા રક્ષેત્ પશ્ચિમે ચણ્ડિકાઽવતુ ॥ ૧૩॥

વાયવ્યાં ચણ્ડિકા પાતુ ઉત્તરે ચણ્ડિકાઽવતુ ।
ઐશાન્યાં ચણ્ડિકા પાતુ ઊર્ધ્વાધશ્ચણ્ડિકા તથા ॥ ૧૪॥

ચણ્ડિકા રક્ષતે કન્યાં સુતં સ્ત્રીં ચણ્ડિકાઽવતુ ।
ભ્રાતરં ભગિનીં સર્વં ચણ્ડિકા રક્ષતે સદા ॥ ૧૫॥

બન્ધુવર્ગકુટુમ્બાનિ દાસીદાસં તતઃ પરમ્ ।
રક્ષતે ચણ્ડિકા દેવી માતૃભાવાન્મહેશ્વરી ॥ ૧૬॥

ગજવાજિગવાન્ સર્વાન્ જન્તૂનાં સર્વપર્વસુ ।
રક્ષતે ચણ્ડિકા દેવી સ્વીયભાવેન શામ્ભવી ॥ ૧૭॥

વાસ્તુવૃક્ષાદિકં સર્વં ચણ્ડિકા રક્ષતે સદા ।
સૈન્યં સ્વસૈન્યવર્ગાણાં ચણ્ડિકા પરિરક્ષતુ ॥ ૧૮॥

શ્મશાને પ્રાન્તરેઽરણ્યે ચણ્ડિકા પાતુ સર્વદા ।
રાજદ્વારે રણે ઘોરે પર્વતે વા જલે સ્થલે ॥ ૧૯॥

અગ્નિવજ્રાદિદુર્યોગે વિવાદે શત્રુસઙ્કટે ।
ચણ્ડિકા પાતુ સર્વત્ર યથા ધેનુઃ સુતં પ્રતિ ॥ ૨૦॥

ઇતિ તે કથિતં કાન્તે ! ત્રૈલોક્યમઙ્ગલાભિધમ્ ।
ત્રૈલોક્યમઙ્ગલં નામ કવચં પરિકથ્યતે ॥ ૨૧॥

॥ ફલશ્રુતિ ॥

ઇદં કવચમજ્ઞાત્વા રુદ્રચણ્ડીં પઠેદ્ યદિ ।
સિદ્ધિર્ન જાયતે તસ્ય કલ્પકોટિશતૈરપિ ॥ ૨૨॥

ઇદં કવચમજ્ઞાત્વા ચણ્ડીપાઠં કરોતિ યઃ ।
વિપરીતં ભવેત્ સર્વં વિઘ્નસ્તસ્ય પદે પદે ॥ ૨૩॥

તદનન્તં ભવેત્ સર્વં કવચાધ્યાયમાત્રતઃ ।
ધારણે કવચં દેવી ફલસઙ્ખ્યાપ્રપૂરકમ્ ॥ ૨૪॥

તત્રૈવ કવચં દેવિ ! સર્વાશાપરિપૂરકમ્ ।
પઞ્ચવક્ત્રેણ કથિતં કિં મયા કથ્યતેઽધુના ॥ ૨૫॥

ભૂર્જે ગન્ધાષ્ટકેનૈવ લિખેત્ તુ કવચં શુભમ્ ।
સમન્ત્રં કવચં દેવિ ! સ્વમન્ત્રપુટિતં તતઃ ॥ ૨૬॥

ગોત્રં નામ તતઃ કામં પુનર્મન્ત્રં લિખેત્ પ્રિયે ! ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં પક્ષયોરુભયોરપિ ॥ ૨૭॥

પ્રાણપ્રતિષ્ઠામન્ત્રેણ પ્રતિષ્ઠાં કુરુતે તતઃ ।
પૂજયેદ્ વિધિયુક્તેન પઞ્ચાઙ્ગં તદનન્તરમ્ ॥ ૨૮॥

એવં તે ધારયેદ્ યસ્તુ સ રુદ્રો નાત્ર સંશયઃ ।
કણ્ઠે વા દક્ષિણે બાહૌ હૃન્નાભિકટિદેશતઃ ॥ ૨૯॥

યોષિદ્ વામભુજે ધૃત્વા સાક્ષાત્ કાલી ન સંશયઃ ।
ધનં પુત્રં જયારોગ્યં યદ્ યન્મનસિ કામદમ્ ॥ ૩૦॥

તત્તત્ પ્રાપ્નોતિ દેવેશિ ! નિશ્ચિતં મમ ભાષિતમ્ ।
ન સન્દેહો ન સન્દેહો ન સન્દેહઃ કદાચન ॥ ૩૧॥

દેયં શિષ્ટાય શાન્તાય ગુરુભક્તિરતાય ચ ।
શક્તિધ્યેયાઃ શક્તરતાઃ શક્તિપ્રાણાઃ સદાશયાઃ ॥ ૩૨॥

એવં તલ્લક્ષણૈર્યુક્તં કવચં દીયતે ક્વચિત્ ।
નિત્યં પૂજા પ્રકર્તવ્યા કવચં પરમં શિવે ! ॥ ૩૩॥

અશક્તૌ પરમેશાનિ ! પુષ્પધૂપં પ્રદાપયેત્ ।
તસ્ય દેહે તસ્ય ગેહે ચણ્ડિકા ત્વચલા ભવેત્ ॥ ૩૪॥

ખલે દુષ્ટે શઠે મૂર્ખે દામ્ભિકે નિન્દકે તથા ।
શક્તિનિન્દાં શક્તિહિંસાં યઃ કરોતિ સઃ પામરઃ ॥ ૩૫॥

એતેષાં પરમેશાનિ ! સુકૃતિર્ન કદાચન ।
ન દદ્યાત્ કવચં દેવિ ! યદીચ્છેદાત્મનો હિતમ્ ॥ ૩૬॥

દત્તે ચ સિદ્ધિહાનિઃ સ્યાદ્ દત્તે ચ શિવહા ભવેત્ ॥ ૩૭॥

॥ શ્રીરુદ્રયામલતન્ત્રે શ્રીપાર્વતીરહસ્યે ત્રૈલોક્યમઙ્ગલં
નામ રુદ્રચણ્ડીકવચં સમ્પૂર્ણં શુભં ભૂયાત્ ॥

Proofread by Lalitha Parameswari parameswari.lalitha at gmail.com, NA

---

*Shri Rudrachandi Trailokyamangala Kavacham*
pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*